श्री महाशास्त अष्टकं

गजेंद्रशार्दूल मृगेंद्रवाहनं
मुनींद्रसंसेवित पादपंकजं ।
देवीद्वयेनावृत पार्श्वयुग्मं
शास्तारमाद्यं सततं नमामि ॥1॥

हरिहरभवमेकं सच्चिदानंदरूपं
भवभयहरपादं भावनागम्यमूर्तिं ।
सकलभुवनहेतुं सत्यधर्मानुकूलं
श्रितजनकुलपालं धर्मशास्तारमीडे ॥2॥

हरिहरसुतमीशं वीरवर्यं सुरेशं
कलियुगभवभीतिध्वंसलीलावतारं ।
जयविजयलक्ष्मी सुसंसृताजानुबाहुं
मलयगिरिनिवासं धर्मशास्तारमीडे ॥3॥

परशिवमयमीड्यं भूतनाथं मुनींद्रं
करधृतविकचाब्जं ब्रह्मपंचस्वरूपं ।
मणिमयसुकिरीटं मल्लिकापुष्पहारं
वरवितरणशीलं धर्मशास्तारमीडे ॥4॥

हरिहरमयमाय बिंबमादित्यकोटि
त्विषममलमुखेंदुं सत्यसंधं वरेण्यं ।
उपनिषदविभाव्यं ओंइतिध्यानगम्यं
मुनिजनहृदि चिंत्यं धर्मशास्तारमीडे ॥5॥

कनकमय दुकूलं चंदनार्द्रावसिक्तं
सरसमृदुलहासं ब्राह्मणानंदकारं ।
मधुरसमयपाणिं मारजीवातुलीलं
सकलदुरितनाशं धर्मशास्तारमीडे ॥6॥

मुनिजनगणसेव्यं मुक्तिसाम्राज्यमूलं
विदितसकलतत्वज्ञानमंत्रोपदेशं ।
इहपरफलहेतुं तारकं ब्रह्मसंज्ञं
षडरिमलविनाशं धर्मशास्तारमीडे ॥7॥

मधुरसफलमुख्यैः पायसैर्भक्ष्यजालैः
दधिघृत परिपूर्णैरन्नदानैस्संतुष्टं ।
निजपदनमितानां नित्यवात्सल्यभावं
हृदयकमलमध्ये धर्मशास्तारमीडे ॥8॥

भवगुणजनितानां भोगमोक्षाय नित्यं
हरिहरभवदेवस्याष्टकं सन्निधौ यः ।
पठति सकलभोगान् मुक्तिसाम्राज्यभाग्ये
भुविदिवि? च तस्मै नित्यतुष्टो ददाति ॥9॥

इति श्रीमहाशास्ताष्टकं संपूर्णं ।